# Shri Chakra Upanishad

# શ્રીચક્રોપનિષત્

## Document Information

Text title : chakropaniShat

File name : chakropaniShat.itx

Category : upanishhat, devii, devI, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# શ્રીચક્રોપનિષત્

ૐ અથાહ વૈ શ્રીચક્રે નિત્યાક્રાન્તે ।
ગૌરીર્મિયાય સલિલાનિ તક્ષત્યેકપદી દ્વિપદી સા ચતુષ્પદી ।
અષ્ટાપદી નવપદી બભૂવુષી સહસ્રાક્ષરા પરમે વ્યોમન્ ॥

ઇતિ પ્રત્યહં સસઙ્ગતિ સહસ્રં કલશાન્ સ્થાપ્ય શતં વા નવ વા
સર્વાભાવે પૂર્ણાભિષેકં ચરેત્ । અષ્ટાષ્ટકં ચરેત્ । પઞ્ચપઞ્ચકં
વા ચરેત્ । સર્વાભાવે શતં પૂજયેત્ । અમૃતત્વં ગચ્છતિ ।
શ્રીચક્રન્યાસં ચરેત્ । સ વ્યાપકત્વં ગચ્છતિ । મૂલાધારાદ્બિલાન્તં
ક્રમેણ ન્યસેત્ । સ્વરાટ્ચક્રં વિરાટ્ચક્રં સમાટ્ચક્રં વિરાજ્યચક્રં
વિશ્વરૂપચક્રં શત્રુજિચ્ચક્રં ક્રમેણ સપ્તકલામયં ન્યસેત્ ।
સ શિવો ભવેત્ । સ કવિર્ભવેત્ । સ સર્વસિદ્ધીશ્વરો ભવેત્ ।
સ નવનાથાધિષ્ઠિતો ભવેત્ । સ ભુવનારાધિતો ભવેત્ । નિર્વિકલ્પેન
મનસા યશ્ચરેચ્છક્તિદેહે સ કાલીરૂપો ભવેત્ । વિના શક્તિં ન મોક્ષો
ન જ્ઞાનં ન સત્યં ન ધર્મો ન તપો ન હરિર્ન હરો ન વિરિઞ્ચિઃ ।
સર્વં શક્તિયુક્તં ભવેત્ । તત્સંયોગાત્ સિદ્ધીશ્વરો ભવેત્ ।
ઇતિ શિવમ્ ॥

(શાક્ત-ઉપનિષદઃ)

ઇત્યાથર્વણે સૌભાગ્યકાણ્ડે શ્રીચક્રોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Shri Chakra Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*